दिनाङ्क :- 15.05.2025

प्रात: - 06:55

<u>मन्त्रिमण्डलोपवेशनम्</u>

प्रशासनेन उत्तरप्रदेशे जेवर-विमानपत्तनस्थानकस्य निकषा सेमीकण्डक्टर-इति अर्द्धचालकघटकस्य स्थापनायै स्वीकृति: प्रदत्ता। नवदिल्ल्यां मन्त्रिमण्डलस्तरीयोपवेशनस्य अनन्तरम् सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: सूचितवान् यत् अयम् प्रतिमासं विंशतिसहस्र-वेफर्स-इत्येतस्मै शैलीगतरूपेण विनिर्मितो विद्यते। अपि च एच्.सी.एल्-फॉक्सकॉन-इत्यनयो: संयुक्तोद्यमेन सह इण्डिया-सेमीकन्डक्टर-मिशन-इत्येतस्य अन्तर्गतं स्थापयिष्यते। श्रीवैष्णवेन अग्रे विज्ञापितं यत् प्रतिमासं षट्त्रिंशर्बुदरूप्यकाणि अस्य घटकस्य शैलीगतोत्पादनक्षमता वर्तते।

मन्त्रिणा प्रोदीरितं यत् पञ्च अर्द्धचालकघटका: पूर्वमेव निर्माणस्य उन्नतसोपानेषु सन्ति साम्प्रतम् अनेन षट् घटकेन सह भारतम् रणनीतिकरूपेण महत्वपूर्णार्द्धचालककोद्योगं विकसयितुं स्वयात्रायाम् अग्रे यास्यति।

<u>प्रधानमन्त्री -अर्द्धचालक:</u>

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान्यत् उत्तरप्रदेशे सेमीकन्डक्टर इत्येतस्य घटकस्थापनाया: मन्त्रिमण्डलस्य निर्णयेन विकासाय नवाचाराय च वृद्धिं मेलिष्यति। अपि च अनेन हि यूनां कृते वृत्सवसरा: अपि सृजिता: भविष्यति। सेमीकन्डक्टर-क्षेत्रे निरन्तम् भारतस्य उपलब्धि: वरीवर्धमानो वर्तते।

<u>छत्तीसगढ राज्यम्-माओवादिन:</u>

छत्तीसगढराज्ये माओवाद-विरोधि-अभियाने आहत्य षोडशसङ्ख्यका: महिला-माओवादिन: समेत्य एकत्रिंशत्- सङ्ख्यका: माओवादिन: मारिता: बीजापुरजनपदे एकस्मिन् संयुक्तवार्ताहरसम्मेलने केन्द्रीयारक्षितारक्षिबलस्य महानिदेशक: ज्ञानेन्द्रप्रतापसिंह: बीजापुरस्यैव आरक्ष्यधीक्षक: जितेन्द्रकुमारयादव: छत्तीसगढस्य आरक्षि-महानिदेशक: च अरूण-देवगौतम: इमां सूचनां प्रदाय उक्तवन्त: यत् अभियानमिदं भूयोऽपि एकविंशतिदिनानि यावत् बीजापुर-जनपदे तेलङ्गाना-सीमास्थिते कर्रेगुट्टा-पर्वते प्रचालितम्।

<u>प्रधानमन्त्री-नक्सलवादिन:</u>

प्रधानमन्त्री नरेन्द्रमोदी अभिव्यक्तवान् यत् सुरक्षाबलै: अधिगतसफलता एतत् दर्शयति यत् नक्सलवादोन्मूलनाय प्रचल्यमनाम् अभियानं उचितदिशि प्रचलति। केन्द्रीयगृहमन्त्रिण: अमितशाहस्य सामाजिकसन्देशपटले लिखितं सन्देशं विनियमीकृत्य श्रीमोदी प्रतिपादितवान्

यत् प्रशासनं नक्सलप्रभावितक्षेत्रेषु शान्तिं स्थापयितुं तान्च मुख्यधारया सह संयोजयितुं पूर्णतया प्रतिबद्धं वर्तते।

भाजपेतिदलम् आरोपप्रत्यारोप:

भाजपेतिदलेन सिन्दूराभियाने उत्थापितप्रश्नानां कृते विपक्षे कांग्रेसदलं अभिचिह्नितम् । सञ्चारसमूहैः सह भाषमाण: दलप्रवक्ता सुधांशुत्रिवेदी प्रोक्तवान् यत् सिन्दूराभियाने सशस्त्रबलानि स्वीयाद्वितीयवीरताया: निश्चित- योग्यतायाश्च परिचयं प्रदत्तवन्ति। श्रीत्रिवेदिना प्रोदीरितं यत् सिन्दूराभियानं प्रचलति परञ्च कांग्रेसदलस्य निरन्तरं प्रश्न: तेषां मनसि गभीरप्रश्नान् उत्थापयति।

बैडमिण्टन-प्रतिस्पर्धा

बैडमिण्टन्- प्रतिस्पर्धायाम् शीर्षा: भारतीय- बैडमिण्टन्-क्रीडका: अद्य प्रात:काले बैंकॉकनगरे थाईलैण्ड-ओपन-प्रतियोगिताया: प्रप्रागुपान्त्यचक्रे क्रीडिष्यन्ति। पुरूषैकलप्रतिस्पर्धायां यारून-मन्नेपल्ली इत्येतस्य सामुख्यं डेनर्माकदेशीयेन एण्डर्स-एन्टोनसेन इत्यनेन साकं भविव्यति। तत्रैव महिलैकलद्वन्द्व शीर्षभारतीय-क्रीडिका मालविका-बंसोड़-इत्येषा थाईलैण्डदेशस्य रत्चानोक-इन्तानोन इत्यनया साकं क्रीडिष्यति।

रशियादेश: यूक्रेनवार्ता

रशियादेशीय: राष्ट्रपति: व्लादिमीर-पुतिन् इत्येष: तुर्किए-देशस्य इस्ताम्बुलनगरे अद्य भविष्यमाणयां यूक्रेन-रशिया-देशयो: प्रत्यक्षतया प्रतिनिधि-मण्डलस्तरीयायां शान्तिवार्तायाम् भागं नैव ग्रहीष्यति।

एतदतिरिच्य क्रेमलिनइति सूचितवत् यत् राष्ट्रपते: सहायक: व्लादिमिर-मेडिंस्की इत्येष: रशियाप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति इति।

।। इति वार्ता:।।